# Chedanagarakshetram Deva Panchaka Stotram

# छेदानगरक्षेत्रं देवपञ्चकस्तोत्रम्

## Document Information

Text title : Chedanagarakshetram Deva Panchaka Stotram

File name : ChedAnagarakShetraMdevapanchakastotram.itx

Category : deities_misc, vAsudevanElayath, ayyappa, panchaka, raksha

Location : doc_deities_misc

Description/comments : From Bhaktitarangini by Prof. P.C. Vasudevan Elayath

Latest update : December 25, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 25, 2022

*sanskritdocuments.org*

# छेदानगरक्षेत्रं देवपञ्चकस्तोत्रम्

सुब्रह्मण्यक्षेत्रं नव्यं नानोपदेवसङ्घुष्ठम् ।
बहुतलसौधस्योपरि कल्पितमाभाति शिल्पसर्वस्वम् ॥ १॥

अष्टोत्तरशतसङ्ख्यैः सोपानेन यत्र सन्निधेर्मार्गः ।
पार्श्वद्वयेऽपि यस्य प्रकाशतेऽनल्पशिल्पसौन्दर्यम् ॥ २॥

आरोहणावरोहणमार्गोऽयं भक्तसङ्घसङ्कीर्णः ।
सुव्यक्तं नागरिकश्रद्धाभक्तीस्फुटं प्रकाशयति ॥ ३॥

वृत्यर्थं यतमानाः भौतिकविषयेषु सन्ततं सक्तः ।
मानसमूर्जं शान्तिं चिन्वन्ति जना दिने दिने यत्र ॥ ४॥

सायं प्रातश्चैतत् क्षेत्रं सविशेषपावनं भवति ।
अभिषेकैरारतिभिर्वैदिकघोषैस्तथैव पूजाभिः ॥ ५॥

प्रवहति भक्तगलेभ्यो निर्गलिता नामवैखरीगङ्गा ।
यत्र स्नात्वा श्रोत्रं नृणाञ्च चित्तं पावितं भवति ॥ ६॥

नारायणीयगीताभागवतादीनि सूक्तिरत्नानि ।
पारायणप्रभाषणगोचरतां यान्ति भूरिशो यत्र ॥ ७॥

क्षेत्राङ्कणे विशाले प्रादक्षिण्यं विधाय भक्तजनाः ।
नानोपदेवदर्शनपुण्यं सम्पादयन्ति सानन्दम् ॥ ८॥

रमणीयचन्द्रशालाकल्पेऽत्र समागतैर्हृमदयवद्भिः ।
परितो नगरी लक्ष्मीद्रृदश्या क्षेत्रस्य मौक्तिकीमाला ॥ ९॥

छेदानगरीदेव्याः फालतले भासमानममलतरम् ।
सुन्दरसिन्दूरमयं तिलकमिदं देवमन्दिरं जयति ॥ १०॥

तदिदं पञ्चकन्तर्विकसद्भक्त्यादरधृदयेन ।
संस्तूयते मया, तद् ददातु मह्यं सदा मनःशान्तिम् ॥ ११॥

स्कन्दः -

सुरभिलकर्पूरमहानीराजननित्यतृप्तनिखिलगुरो ।
आर्तत्राणपरायण, भवन्तमीडे दयामयं देवम् ॥ १२॥

जय जय तारकवैरिन्! शक्तिधर, क्रौञ्चदारण, स्वामिन् ।
सुन्दरमयूरवाहन, दयानिधे पाहि नित्यदासान् नः ॥ १३॥

हर हर हर हर नन्दन! सिन्दूराक्तसुन्दराङ्ग, विभो ।
भक्ताभीष्टविधायक, नौमि त्वां देव! देवसेनान्यम् ॥ १४॥

भक्तप्रिय, भगवंस्त्वं भजामि वाञ्छन् सदा मनःशान्तिम् ।
विपदस्त्रायस्व विभो दयःनिधे पाहि नित्यदासान् नः ॥ १५॥

गुरुवायुपुरेशः -

छेदानगरनिवासिन्! गुरुवायुपुरेश सच्चिदानन्द!
मन्दस्मितार्द्रवदनं कृष्णं त्वामन्वहं वन्दे ॥ १६॥

तैलभिषेचनाद्यैः केरलपूजाक्रमैः समाराद्धम् ।
अस्माकमिष्टदेवं छेदानगरस्थितं भजे कृष्णम् ॥ १७॥

प्रत्यहमुषसि हरे त्वां तैलक्षीरादिनाभिषिक्ततनुम् ।
व्यञ्जितकिशोरभावं ध्यायामि विभो, प्रसीद मयि नित्यन् ॥ १८॥

छेदानगरीसंस्थं गुरुवायुपुरीपतिं दयासिन्धुम् ।
हन्त भजन्तो वयमिह शान्तिं विन्देम मानसीं नित्यम् ॥ १९॥

धर्मशास्ता -

शबरिगिरीश्वर, शान्तं छेदानगरे कृताधिवासं त्वाम् ।
भक्तजनैराराद्धं पश्यामि भजामि धन्यधन्योऽस्मि ॥ २०॥

शरणं शरणं यामस्तावकपादाम्बुजं दयासिन्धो!
जीवितमस्तु मम त्वद्दास्यमयं धर्मकर्मसम्पूर्णम् ॥ २१॥

त्वद्दासे मयि करुणां धेहि विधेहि स्थिरां मनःशान्तिम् ।
निर्मयमस्तु मनस्त्वयि विश्रान्तं सच्चिदानन्ते ॥ २२॥

देवी -

देवि! महाकालि! महालक्ष्मीमहाशारदाम्बिके गौरी ।
शक्तिन्त सम्पदमेव च विद्यां नो देहि पाहि नो विपदः ॥ २३॥

शक्तिस्वरूपिणि, शिवे, भुक्तेर्मुक्तेश्च साधिके, देवि!
त्वत्पदनलिनद्वन्द्वे पतामि भक्त्याः प्रसीद मयि नित्यम् ॥ २४॥

सिन्दूरतिलकसुन्दरफलां कारुण्यवर्षिनयनान्ताम् ।
मन्दस्मितार्द्रवदनां ध्यायामि त्वां महेश्वरीं मायाम् ॥ २५॥

विघ्नेशः -

भगवन्, गणनाथ, विभो, छेदानगरे कृताधिवासं त्वाम् ।
विघ्नविदारणदक्षं नौमि भवन्तं प्रसीद मयि दासे ॥ २६॥

शिवशक्तितत्वमेकं प्रत्यूहव्यूहनाशकं देवम् ।
सिन्दूरारुणिताङ्गं वन्देहं शान्तमद्भुताकारम् ॥ २७॥

सिद्धिविनायक, वन्दे बुद्धिविकासप्रदं महाकायम् ।
तुन्दामर्शकशुण्डं भवन्तमीशं प्रसन्नवदनाब्जम् ॥ २८॥

इति श्रीवासुदेवन् एलयथेन विरचितं छेदानगरक्षेत्रं
देवपञ्चकस्तोत्रं सम्पूर्णम् ।

*Chedanagarakshetram Deva Panchaka Stotram*
pdf was typeset on December 25, 2022

Please send corrections to *sanskrit@cheerful.com*